# 2018

## SANSKRIT – HONOURS

### Paper : CC-1

### (Classical Sanskrit Literature – Poetry)

### Full Marks : 65

*The figures in the margin indicate full marks.*

*Candidates are required to give their answers in their own words as far as practicable.*

### Section - A

### Unit - II

1. रघुवंशमहाकाव्यस्य प्रथमसर्गे वर्णिताः राज्ञः दिलीपस्य गुणाः यथापाठ्यं विव्रियन्ताम्। 10

*अथवा,*

"तदन्वये शुद्धिमति प्रसूतः शुद्धिमत्तरः। दिलीप इति राजेन्दुः" — अत्र तच्छब्देन कस्योल्लेखः विहितः? राज्ञः दिलीपस्य चारित्रिकं वैशिष्ट्यं यथापाठ्यं विव्रियताम्। 1+9

### Section - B

### Unit - I

2. कुमारसम्भवमहाकाव्यस्य पञ्चमसर्गे विधृतायाः पार्वत्या समाचरितायाः तपस्यायाः वर्णनं विधाय तथाविधतपश्चरणे कारणमपि संस्कृतभाषया देवनागरीलिप्या च विव्रियताम्। 7+3

*अथवा,*

(a) अधोलिखितयोः **कस्यचित् एकस्य** संस्कृतभाषया देवनागरीलिप्या च सप्रसङ्गं व्याख्या कार्या। 5

(i) मनीषिताः सन्ति गृहेषु देवता-
स्तपः क्व वत्से क्व च तावकं वपुः।
पदं सहेत भ्रमरस्य पेलवं
शिरीषपुष्पं न पुनः पतत्रिणः।।

(ii) क्लमं ययौ कन्दुकलीलयापि या तया मुनीनां चरितं व्यगाह्यत।
ध्रुवं वपुः काञ्चन-पद्म-निर्मितं मृदु प्रकृत्या च ससारमेव च।।

(b) अधोलिखितयोः **कस्यचित् एकस्य** संस्कृतभाषया देवनागरीलिप्या च भावः सम्प्रसार्यताम्। 5

(i) प्रियेषु सौभाग्यफला हि चारुता।

(ii) पङ्कजं सशैवलासङ्गमपि प्रकाशते।

## Unit - II

3. अधोलिखितेषु **पञ्चानामु**त्तरं संस्कृतभाषया देवनागरीलिप्या च देयम्। 5×2

(a) कस्मिन् विषये केषां वयः जनैः न समीक्ष्यते?

(b) "वदन्त्यपर्णेति च तां पुराविदः" — वाक्यस्यास्य शुद्धता विचारणीया।

(c) कथं पार्वती अपर्णेति नाम्ना संज्ञिता?

(d) कीदृशः आसीत् पार्वत्याः पारणाविधिः?

(e) "निकाम विविधेन वह्निना" — अत्र विविधशब्देन कतिविधाः अग्नयः सूचिताः?

(f) कथं पार्वती तपस्विनां तपः तिरश्चकार?

(g) कुमारसम्भवस्य पञ्चमसर्गस्य शिरोनाम किमस्ति?

## Section - C

### Unit - I

4. किरातार्जुनीयमहाकाव्यस्य प्रथमसर्गे वनेचरस्य उक्तिषु प्रतिविम्बिता दुर्योधनस्य राज्यशासन-पद्धतिः संस्कृतभाषया देवनागरीलिप्या च लिख्यताम्। 10

*अथवा,*

(a) अधोलिखितयोः **कस्यचित् एकस्य** संस्कृतभाषया देवनागरीलिप्या च सप्रसङ्गं व्याख्या कार्या। 5

(i) कृतप्रणामस्य महीं महीभुजे
जितां सपत्नेन निवेदयिष्यतः।
न विव्यथे तस्य मनो न हि प्रियं
प्रवक्तुमिच्छन्ति मृषा हितैषिणः॥

(ii) तथापि जिह्मः स भवज्जिगीषया
तनोति शुभ्रं गुणसम्पदा यशः।
समुन्नयन् भूतिमनार्यसङ्गमाद्
वरं विरोधोऽपि समं महात्मभिः॥

(b) अधोलिखितयोः **कस्यचित् एकस्य** संस्कृतभाषया देवनागरीलिप्या च भावः सम्प्रसार्यताम्। 5

(i) हितं मनोहारि च दुर्लभं वचः।

(ii) निगूढतत्त्वं नयवर्त्म विद्विषाम्।

## Unit - II

5. अधोलिखितेषु **पञ्चानां** प्रश्नानामुत्तरं संस्कृतभाषया देवनागरीलिप्या च लेखनीयम्। 2×5

(a) दुर्योधनस्य राजत्वकाले कुरुदेशः देवमातृको वा नदीमातृको वा अभवत्?

(b) "प्रियाणि वाञ्छन्त्यसुभिः समीहितुम्" — के प्राणविनिमयेनापि कस्य प्रियकार्याणि कर्तुम् इच्छन्ति?

(c) परराष्ट्रविषयकं तथ्यं कथं दुर्योधनेन विज्ञातम्?

(d) दुर्योधनः कं यौवराज्ये नियुज्य किमकरोत्?

(e) निःसपत्नस्यापि दुर्योधनस्य कथमासीद् युधिष्ठिरात् भयाशङ्का?

(f) कस्य पराक्रमनुस्मृत्य दुर्योधनः व्यथितोऽभवत्?

(g) "प्रवृत्तिसाराः खलु मादृशां गिरः" — अत्र "मादृश"-शब्देन केषां ग्रहणं वोध्यम्? "प्रवृत्तिसाराः" इति पदस्यार्थः लिख्यताम्।

## Section - E

## Unit - I & II

6. अधोलिखितेषु **त्रयाणां** टीका लेखनीया। 5×3

(a) अश्वघोषः

(b) शिशुपालवधम्

(c) भट्टिकाव्यम्

(d) श्रीहर्षः

---